# 4

# कुमारसम्भव महाकाव्ये कमलपुष्पस्य वैज्ञानिकमहत्त्वम्

**डॉ.नीरज तिवारी**
असिस्टेंट प्रोफेसर,संस्कृत साहित्यविद्याशाखा
केन्द्रीय संस्कृतविश्वविद्यालयःलखनऊ
Email: neerajtiwaribhu@gmail.com

## प्रस्तावना शोधसारश्च

संस्कृतवाङ्मयस्य रचनायां प्रायः प्रकृतीनां सजीवं निर्जीवञ्च चरित्र-चित्रणं सर्वेकवयः विद्वांसश्च कृतवन्तः।महाकविकुलगुरुकालिदासः कुमारसम्भवमहाकाव्ये अनेकेषां पुष्पाणां वर्णनं करोति। सम्पूर्णकुमारसम्भवमहाकाव्ये त्रयस्त्रिंशत्स्थलेषु कमलपुष्पस्य वर्णनं लभ्यते। तत्रादौ उमोत्पत्तिनामके प्रथमसर्गे, ब्रह्मसाक्षात्कारनामके द्वितीयसर्गेऽपि, मदनदाहनामके तृतीयसर्गे, तपःफलोदयनामके पञ्चमसर्गे, उमाप्रदाननामके षष्ठसर्गे, उमापरिणयनामके सप्तमसर्गे, उमासुरतवर्णननामके अष्टमे सर्गे एवञ्चकुमारसैनापत्यनामके द्वादशसर्गे कमलस्य साङ्गोपाङ्गनिरूपणं प्राप्यते। कविः उपर्युक्तस्य कमलपुष्पस्य यद्वा कमलपत्र-नाल-परागादिसन्दर्भस्योल्लेखं काव्ये काव्यकथाप्रसङ्गाद् विदधाति। परन्तु काव्ये आगतं कमलं यद्वा कमलावयवानाम् अस्माकं जीवनस्य कृते किं वैज्ञानिकानि रहस्यानि उपयोगाश्चवर्तन्तेइतिविचारःवानस्पतिकस्वरूपसहितं रासायनिकमौचित्यस्योद्घाटनपूर्वकं आयुर्वेदात्मकमुपयोगमुद्घाट्य धार्मिकं प्रयोजनमपि अत्र प्रतिपादितं वर्तते।

**कूटशब्दाः -**


Volume 4, Issue 2, 2025, p 49-66, ISSN 2583-6331
©Indira Gandhi National Open University

शतपत्रम्, सहस्रपत्रम्, बिसप्रसूनः,उत्पलाक्षी, चञ्चला, पितामहः, शेषनागः, सप्तमातरः, वनसूकराः, भ्रमराः, कुमुदः, गन्धर्वाः, महादेवः, पुण्डरीक, इन्दीवरं, कोकनदः।

**कमलस्य विविधभाषासु नामानि-**

**संस्कृत**- नलिनम्, अरविन्दम्, महोत्पलम्, सहस्रपत्रम्, कमलम्, शतपत्रम्, कुशेशयम्, पङ्केरुहम्, तामरसम्, सारसम्, सरसीरुहम्, बिसप्रसूनः, राजीव, पुष्करः,अम्भोरुहः।[1]**हिन्दी**- कमल,पुरइन, **आङ्गल**- Saored Lotus (सैक्रेड लोटस्), **वैज्ञानिक**- Nelumbium Speciosum Willd (नेलंबियम्स्पेसिओजम्विल्ड), **मराठी**- कमल,**गुजराती**- कमल, **बंगला**- पद्म, **उड़िया** -पदमइति।

**कमलपुष्पविषये काव्यानुशीलनम्-**

महाकविना कुमारसम्भवमहाकाव्ये बहुषु स्थलेषुकमलस्य वर्णनं रक्तकमलं, श्वेतकमलं, नीलकमलं, पद्मं, पद्मिनी, कुमदादिभेदेन कृतम्। सम्पूर्णकुमारसम्भवमहाकाव्ये त्रयस्त्रिंशत्स्थलेषु अस्य वर्णनं लभ्यते। तत्रादौ उमोत्पत्तिनामके प्रथमसर्गे प्रतिपादनं वर्तते। अत्र कविना पार्वत्याः सौन्दर्यवर्णने उत्पलाक्षी इति विशेषणं प्रयुक्तम्। अत्र कमलनेत्रायाः पार्वत्याः परस्परमुत्पीड्यद् धवलं श्याममुखं कुचद्वयं, कियदन्तरमनयोरित्यवगन्तुं परीक्षाप्रसङ्गे तन्मध्यं नीयमानस्य बिसतन्तोरन्तरमपि यथा परीक्षकजनेन न लभ्यं तथा प्रवृद्धमासीदिति। तद्यथा -

**अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धम्।**
**मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम् ॥**[2]


Volume 4, Issue 2, 2025, p 49-66, ISSN 2583-6331
©Indira Gandhi National Open University

अपि च अस्मिन्नेव सर्गे पार्वत्याः चारुतासन्दर्भे उपलभ्यते।अत्र चञ्चला लक्ष्मीः पूर्णचन्द्रं प्राप्ता सती कमलगतान् दिवारमणीयत्वसौरभ्यादीन् गुणान् नानुभवति, अर्थात् कमलं प्राप्य सती चन्द्रगताॅंन् रजनीरमणीयत्वादिकान गुणान्नानुभवति। सर्वकालरमणीयस्वाभाविकसौरभ्याभिरामं पार्वतीवदनं प्राप्य तु लक्ष्मीश्चन्द्रकमलोभयानुभवजन्यमानन्दमाससादेति। तद्यथा–

**चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम्।**
**उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥**[3]

अथ च ब्रह्मसाक्षात्कारनामके द्वितीयसर्गेऽपि कमलस्य निरूपणं लभ्यते। प्रातः काले मुकुलितपद्मानि सरोवराणांसूर्यइव, कल्पान्त कृशानु कल्पेन तारकासुर भुज बलोष्मणापरिम्लानमुखानां बर्हिर्मुखानां दयानिधिःपितामहःस्वयमेवात्मानंदर्शितवानिति। उक्तञ्च–

**तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम्। सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥**[4]

अपि च अस्मिन्नेव सर्गे कमलस्य अपरत्र प्रसङ्गे वर्णनक्रमे लिखितं खलु ब्रह्मणः वार्तां श्रुत्वा इन्द्रः स्वकीयं सहस्रनेत्रं अनेन प्रकारेण चालितवान् यथा बृहस्पतिं वक्तुंएतत्सदृशं संकेतं कृतवान् यत्सदृशं मन्दं मन्दं पवनवेगेन कमलवनं कम्पायमानं भवति। यथा -

**ततो मन्दानिलोद्धूतकमलाकरशोभिना। गुरुं नेत्रसहस्रेण चोदयामास वासवः ॥**[5]

एवञ्च अस्मिन्नेव सर्गे तारकनामकदैत्यस्य आक्रान्तवर्णने कमलस्य विवेचनं वर्तते। सूर्यस्तारकासुरनगरे यावन्मात्रेण निजातपेन वापीकमलविकासं करोति, तावन्मात्रमेवातपं करोतीत्यर्थः। कठोरकिरणोऽपि सूर्यस्तद्भीत्या पुरे मन्दोष्णःसन्नेवप्रकाशतइति।तद्यथा–


©Indira Gandhi National Open University

**पुरे तावन्तमेवास्य तनोति रविरातपम्। दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥**[6]

अपि च अस्मिन्नेवसर्गे तारकनामकस्य दैत्यस्य आतंक सन्दर्भे उल्लेखितंय तारकासुरःस्वर्गङ्गा सुवर्णपङ्कजान्युन्मूल्यस्ववापीरचनायामुपयोजितवान्, ततश्च संप्रति दिग्गज मदजल कलुषी कृतं स्वर्ग गङ्गा जल मे वशिष्ट मस्तीति।यथा–
**मन्दाकिन्याःपयःशेषंदिग्वारणमदाविलम्। हेमाम्भोरुहसस्यानां तद्वाप्यो धाम साम्प्रतम् ॥**[7]

अथ च कमलस्य वर्णनं मदनदाहनामके तृतीयसर्गेऽपि प्राप्यते। अत्र यथा कामिनी सुरभिलकुसुमादिसंस्कृतं सुखासवं कामिने ददाति, तद्वत् अतिरागात् करिणी कमल पराग सुगन्ध युक्तं मुखान्तर्गत जलंकरिणे दत्तवती। चक्र वाकोऽ पिमुख ताम्बूलार्पणेनेवार्धजग्धेन मृणालेन प्रियतमां चक्रवाकीं सम्मानित वानिति। यथा–

**ददौ रसात्पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः।**
**अर्धोपभुक्तेन बिसेन जायां सम्भावयामास रथाङ्गनामा ॥**[8]

अपि च अस्मिन्नेव सर्गे अन्यत्रापि कमलस्य विवेचनं लभ्यते। अत्र ब्रह्मशिरः कपालनेत्ररन्ध्रनिर्गतैः ब्रह्मरन्ध्रादुद्भूतैस्तेजोऽङ्कुरैः बिसतन्तुविशेषमार्दवा जटाकोटितटघटित बालचन्द्ररश्मीं तिरस्कुर्वन्तं हरं ददर्श। प्रबलसन्निधौ दुर्बलो ग्लानिमेतीति हि लोकप्रसिद्धमिति। यथा -

**कपाल नेत्रान्तर लब्धमार्गै ज्योतिः प्ररोहैरुदितैः शिरस्तः।**
**मृणाल सूत्राधिकसौ कुमार्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः॥**[9]


©Indira Gandhi National Open University

अपि च अस्मिन्नेव सर्गे अपरत्र प्रसङ्गे कमलबीजस्य वर्णनं प्राप्यते। प्रणामानन्तरं पार्वती कृततपश्चरणाय हराय रक्तवर्णेन स्वहस्तेन-सूर्यरश्मिकृतशोषणां गङ्गापद्मबीजनिर्मितमालिकां समर्पितवतीति। यथा-

**अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण।**
**विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ॥**[10]

अथ च अस्यैव सर्गस्यान्तिमे श्लोके कमलस्य निरूपणप्रसङ्गो वर्तते।अत्र तत्क्षणे हिमवान् हरकोपभयेन निमीलितनेत्रां दयनीयां स्वकन्यां पार्वतीं स्वहस्ताभ्यां गृहीत्वा, दन्ताभ्यां कमलिनीमादायैरावत इव, रयेणायतीकृतशरीरः सन् पन्थानमनुसृत्य जगामेति। तद्यथा -

**सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्।**
**सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नां प्रतिपथगतिरासीद्वेगदीर्घीकृताङ्गः ॥**[11]

अनेन प्रकारेण कमलस्य वर्णनं रतिविलापनामके तृतीयसर्गेऽपि वर्तते। यदा रतिः विलापं करोति तदेव कथयति हे वल्लभ यथा प्रचण्डजलप्रवाह: सेतुमवभज्य जलौकाधीनजीविता कमलिनीमितस्ततो विक्षिप्य त्वरितं गच्छति, तद्वत् त्वं मत्सौहार्दं त्यक्त्वा त्वदेकाधीनजीवितां मां परित्यज्य, कस्मिन् प्रदेशे गतोऽसीति। यथा -

**क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः।**
**नलिनीं क्षतसेतुबन्धनो जलसङ्घात इवासि विद्रुतः ॥**[12]

अथ च अस्मिन्नेव सर्गे कमलस्य विषये अत्रापि चर्चा वर्तते। अत्र त्वत्सहायभूतेनानेन वसन्तेनैव सदेवदानवः सकलोऽपि लोकः पुष्पमयत्वात् बिसतन्तुगुणत्वाच्चातिदुर्बलस्यापि तव चापस्य वशं नीतः, तस्मादुपकारिणेऽस्मै मित्राय वसन्ताय स्वदर्शनमवश्यमेव दातव्यमिति। यथा-

**अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव।**


©Indira Gandhi National Open University

**बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः ॥**[13]

अथ च कविना तपःफलोदयनामके पञ्चमसर्गेऽपि वर्णितम्। यथा तपःकालात् पूर्वं पार्वतीमुखं चूर्णकुसुमाद्यलङ्कृतैः केशैर्मनोहरमासीत्, तथैव तपःकालेऽपि जटाभिर्मनोहरमासीत् । कमलं भ्रमरपङ्क्तिभिरेव केवलं न शोभते, अपि तु शैवालसम्पर्कसहितमपि तथैव शोभत इति। यथा-

**यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।**
**न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥**[14]

अस्मिन्नेव सर्गे अपरऽत्र प्रसङ्गे कविः कथयति या पार्वती पूर्वं कन्दुकक्रीडयाऽपि शरीरसादं प्राप्य, तया पार्वत्या कठिनशरीरेण महर्षीणामत्यन्तदुश्चरतपश्चरणरूपो व्यापारोऽव्यगाह्यत। तेनेदमनुमीयते, यत् पार्वत्याः शरीरं सुवर्णकमलविरचितमासीत्। अत एव कमलस्वभावेन सुकुमारमपि सुवर्णस्वभावेन कठिनमेवाभूदिति। यथा -

**क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत।**
**ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥**[15]

अपि च सर्गेऽस्मिन् कमलस्य विषये अत्रापि लिखितं हि सूर्यकिरणैः सन्तप्तं पार्वतीमुखं सूर्यरश्मिसंयोगे सति कमलमिव शुशुभे, न तु मम्लौ। किन्तु प्रकृतिमृदुत्वात् आयतयोस्तदीयनेत्रप्रान्तभागयोः केवलं कालिम्ना मन्दमन्दमवस्थानं कृतमिति। यथा -

**तथाभितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ।**
**अपाङ्गयोः केवलमस्य दीर्घयोः शनैः-शनैः श्यामिकया कृतं पदम् ॥**[16]


©Indira Gandhi National Open University

अपि च अत्रापि कमलस्य वर्णनं वर्तते। अत्र उदवासतत्परत्वादुदके मुखमात्रदृश्या सा पार्वती हेमन्तरात्रौ कमलवत्सुरभिणा, शीतवशात् कम्पमानोष्ठदलसुन्दरेण मुखेन हिमनष्टपङ्कजसमृद्ध्या जलानामविच्छिन्नपङ्कजसम्बन्धमिव चकारेति। यथा -

**मुखेन सा पद्मसुगन्धिना निशि प्रवेपमानाधरपत्रशोभिना।**
**तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्धानमिवाकरोदपाम् ॥**[17]

अथ च सर्गेऽस्मिन् कविः कमलस्य विवेचनं अत्रापि करोति।पार्वतीसम्बन्धिनी वयस्या तमपरमार्थब्रह्मचारिणमुक्तवती। हे सत्पुरुष अस्मिन् विषये तव श्रवणकौतुकञ्चेच्छ्रणु। अहं तत्सर्वमपि ते कथयामि। यादृशवाञ्छितसिध्यर्थे "दर्शनावघ्राणादिभिरुपभोक्तव्यमत्यन्तसुकुमार कमलं केनापि यथातपत्रत्वेन विधीयते" तद्वदनयापि मृदुतरमात्मशरीरमत्यन्तकठिनशरीरसाध्यस्य तपसः साधनत्वेन परिकल्पितमस्तीति। यथा -

**सखी तदीया तमुवाच वर्णिनं निबोध साधो तव चेत्कुतूहलम्।**
**यदर्थमम्भोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः ॥**[18]

अनेन प्रकारेण कमलस्य वर्णनं उमाप्रदाननामके षष्ठसर्गेऽपि लभ्यते। कविरत्र हिमालयस्य विषये उक्तवान् हि यदि भवान् पाताललोकस्य अधस्तलात् ऊर्वीं स्वभारेण भारयुक्तं नैव करोति तर्हि वदतु शेषनागः स्वकमलनालसदृशकिसलयफणोपरि कथं संवहति। यदि त्वं पातालमूलपर्यन्तमधः स्थितः पृथिव्याः धारणं नाकरिष्यः, तर्ह्यनन्तो विसवत्कोमलैः फणैः पृथिव्या धारणं कथमकरिष्यदिति। यथा -

**गामधास्यत्कथं नागो मृणालमृदुभिः फणैः।**
**आ रसातलमूलात्त्वमवालम्बिष्यथा न चेत् ॥**[19]


Volume 4, Issue 2, 2025, p 49-66, ISSN 2583-6331
©Indira Gandhi National Open University

अपि च कमलस्य वर्णनं उमापरिणयनामके सप्तमसर्गेऽपि प्राप्यते। अत्र कुसुमचूर्णादिविभूषितैः केशपाशैरुपलक्षितायाः पार्वत्याः मुखशोभा भ्रमरसहितं कमलं, मेघरेखायुक्तं चन्द्रबिम्बं च, तिरस्कृत्य लोके स्वसादृश्यकथाप्रस्तावं दूरतो निराचकारेति। यथा -

**लग्नद्विरेफं परिभूय पद्मं समेघलेखं शशिनश्च बिम्बम्।**
**तदाननश्रीरलकैः प्रसिद्धैश्चिच्छेद सादृश्यकथाप्रसङ्गम् ॥**[20]

अस्मिन्नेव सर्गे अपरऽत्र कमलविषये उक्तं हि प्रस्थितं तं हरमनुगच्छन्त्यो निजवाहनभूतहंसवृषमयूरादीना गमनसम्भवेन कम्पेन चञ्चलकुण्डला ब्रह्माण्याद्याः सप्तमातरः स्वकान्तिपुञ्जचूर्णधवलैरात्मीयैर्वदनर्गगनं कमलप्रचुरं सर इव चक्रुरिति। यथा -

**तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः।**
**मुखैः प्रभामण्डलरेणुगौरैः पद्माकरं चक्रुरिवान्तरीक्षम् ॥**[21]

अथ च सर्गेऽस्मिन् अन्यत्र सन्दर्भेऽपि कमलस्य विवेचने लिखितं हि प्रवर्धमानमुखेन्दुशोभया लोकोत्तरगुणविशिष्टया पार्वत्या सङ्गच्छमानो हर: "शरदा संसृज्यमानो लोक इव" विकसितनेत्रकुमुदो निर्मलमानसजलश्चासीदिति। यथा

**तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्या।**
**प्रसन्नचेतःसलिलः शिवो ऽभूत्संसृज्यमानः शरदेव लोकः ॥**[22]

अपि च सर्गेऽस्मिन् अपरत्र कमलस्य चर्चाकाले उल्लिखितञ्च शास्त्रज्ञेन हिमवत्पुरोधसा पूर्वोक्तप्रकारेण निर्वर्तितविवाहसंस्कारौ तौ पार्वतीपरमेश्वरौ कमलासनोपविष्टाय ब्रह्मणे नमश्चक्रतुरिति। यथा


©Indira Gandhi National Open University

**इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ।**
**प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय ॥**[23]

अथ च अस्मिन्नेव सर्गे अत्रापि कमलस्य विवेचनमस्ति। अत्र लक्ष्मीः स्वयमेव मूर्तिमती सती तयोरुमामहेश्वरयोः उपरि पत्रान्तलम्बमानजलबिन्दुमुक्ताकलापशोभितदीर्घनालदण्डं कमलमयं श्वेतच्छत्रं दधाविति। तद्यथा -

**पत्रान्तलग्नैर्जलबिन्दुजालैराकृष्टमुक्ताफलजालशोभम्।**
**तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम् ॥**[24]

अनेन प्रकारेण कमलस्य विवेचनं उमासुरतवर्णननामके अष्टमे सर्गेऽपि लभ्यते। अत्रवर्णितं खलु शिवस्य चुम्बनसमये यदापार्वत्याः केशस्य पतत् चूर्णं शिवस्य तृतीये नेत्रे प्रक्षिप्तं जातं तदा तत् नेत्रं पीडितं भवति। तस्मिन् अवसरे नेत्रकष्टवारणाय महादेवः प्रस्फुटितकमलगन्धवत्याः पार्वत्याः मुखस्य पवनवेगपानाय स्वमुखं तस्याः मुखस्य समीपे अकरोद्। यथा

**चुम्बनादलकचूर्णदूषितं शङ्करो ऽपि नयनं ललाटजम्।**
**उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ॥**[25]

अथ च अस्मिन्नेव सर्गे पार्वत्याः जलक्रीडाप्रसङ्गे लिखितञ्च यदा कदा आकाशगंगायां पार्वती विहरणं करोति तस्मिन् समये तस्याः कटितः परितः परितः लघु-लघु मीनाः विचरन्ति। तदा एतस्य दृश्यस्यावलोकनेन एतद् प्रतीयते यद् द्वितीयकटिमेखला अस्तीति। तत्रैव ते स्वर्णकमलं उत्पाट्य-उत्पाट्य महादेवोपरि प्रक्षिपन्ति। तदा महादेवोऽपि एतावतः जलस्य उत्क्षेपणं करोति खलु, तदा पार्वत्याः नेत्रं अमुकुलितं जातमिति। यथा –


©Indira Gandhi National Open University

**हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा।**
**सा व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ॥**[26]

अपि च अस्मिन्नेव सर्गे महादेवः पार्वतीमुक्तवान् यत् पश्यतु प्रिये अस्मिन् समये सूर्यः एतादृशः दृश्यते यत् अयं त्वया रक्तनेत्रसमा कमनीयकमलस्य शोभां लज्जयति तथा चाऽयं सूर्यः दिवस्यावसानं तेनैव प्रकारेण करोति यत् प्रलयसमये ब्रह्मणः सर्वान् संसारान् स्वकीये गर्भे समाहितं करोति। यथा -

**पद्मकान्तिमरुणत्रिभागयोः सङ्क्रमय्य तव नेत्रयोरिव।**
**सङ्क्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः ॥**[27]

अस्मिन्नेव सर्गे अपरत्र प्रसङ्गे वर्णितं हि कमलकेसरं चक्रवाकमिथुनं चञ्चुना उत्थाप्य उभे पृथक् पृथक्भूत्वा आलपर्यन्तौ तदा एतत् कृते सरोवरस्य लघ्वन्तरालमपि स्वल्पं नैव भाति एतस्य कृते तु बृहत्तमः प्रतिभाति। यथा

**दष्टतामरसकेसरस्रजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः।**
**निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥**[28]

अथ च अस्मिन्नेव सर्गे महादेवः पार्वतीं कथयति पश्यतु एते वनसूकराः सरोवरस्य मंथनं कृत्वा आतपवारणाय गाढपङ्कं विलेपितवन्तः। एतेषां दन्ताः मुखाश्च एतादृशाः दृश्यन्ते यथा भक्षणावशेषः कमलनालदण्डः एतेषां मुखे विद्यते। यथा –

**उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः।**
**दंष्ट्रिणो वनवराहयूथपा दष्टभङ्गुरबिसाङ्कुरा इव ॥**[29]


©Indira Gandhi National Open University

अपरत्र सन्दर्भे अस्मिन्नेव सर्गे महादेवः कथयति पश्यतु एतानि कमलानि अस्मिन्समये अमुकुलितानि जातानि सन्ति तथापि स्वल्पकालार्थं स्वमुखं किञ्चिद् मुकुलितवन्तः। यतो हि बाह्ये ये अवशिष्टाः भ्रमराः सन्ति तानपि प्रेमपूर्वकं अभ्यन्तरे करिष्यन्तीति। यथा -

**बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम्।**
**षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥**[30]

अस्मिन्नेव सर्गे अपरत्र सन्दर्भे वर्णितं हि भ्रमरध्वनिकोलाहलेन सह अयं कुमुदः विकसन् एतादृशः प्रतीयते हि अयं अनुलोमवायुना विलोमवायुना च चन्द्रस्य कान्तिं अत्यधिकं पिबन्नासीदिति। एवं तैः अजीर्णकारणात् एतस्य उदरं विस्फुटनकारणेन पीडितमस्तीति। यथा -

**एतदुच्छ्वसितपीतमैन्दवं वोढुमक्षममिव प्रभारसम्।**
**मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमा निबन्धनात् ॥**[31]

अपि च अस्मिन्नेव सर्गे विवेचितं हि यदा ब्राह्ममूहुर्ते कमलानि विकसितानि जातानि, तदानीं वीणाधारिणः गन्धर्वाः आलापेन शंकरस्य स्तवनाय मङ्गलगीतानि गायन्ति, तदैव उषाकाले देवानां पूज्यः महादेवः उत्थितः जातः इति। यथा -

**स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम्।**
**मूर्च्छनापरिगृहीतकैशिकैः किन्नरैरुषसि गीतमङ्गलः ॥**[32]


©Indira Gandhi National Open University

अस्मिन्नेव सर्गे अपरत्र प्रसङ्गे वर्णितं हि शिवस्य शयनादुत्थानानन्तरं तस्मिन्नेव समये गन्धमादनारण्यकस्य पवनः मानसरोवरस्य तरङ्गेषु उत्थायमानं मन्दं मन्दं नुदति स्म येषां स्पर्शेन अत्र भानं भवति हि कमलानि विकसितानि जातानि सन्ति। तद्यथा -

**तौ क्षणं शिथिलितोपगूहनौ दम्पती चलितमानसोर्मयः।**
**पद्मभेदपिशुनाः सिषेविरे गन्धमादनवनान्तमारुताः ॥**[33]

एवञ्च कुमारसैनापत्यनामके द्वादशसर्गेऽपि कमलस्य वर्णनं वर्तते। अत्र मुकलितकमलसदृशः इव इन्द्रः स्वकीयेन सहस्रनेत्रेण शंकरं दृष्टवान्। इदानीं इन्द्रसमक्षे शंकरस्य स्वरूपं मञ्जरीयुक्ताम्रवृक्षः इव दृश्यते। वस्तुतः अत्र इन्द्रस्य नेत्रयोः कृते मुकलितकमलस्य विशेषणं वर्तते। यथा -

**विकस्वराम्भोजवनश्रिया तं दृशां सहस्रेण निरीक्षमाणः।**
**रामालिभिःस्वर्गपतिर्बभासे पुष्पोत्कराकीर्ण इवाम्रशाखी।**[34]

कविः उपर्युक्तस्य कमलपुष्पस्य यद्वा कमलपत्र-नाल-परागादिसन्दर्भस्योल्लेखं काव्ये काव्यकथाप्रसाङ्गात् विदधाति स्म। परन्तु काव्ये आगतं कमलं यद्वा कमलावयवानां अस्माकं जीवनस्य कृते कानि वैज्ञानिकानि रहस्यानि उपयोगाश्च सन्ति इति तानि सर्वाणि विचारयामि

**वानस्पतिकं स्वरूपं महत्त्वञ्च**–

शास्त्रप्रमाणानुसारं कमलस्य त्रयः भेदाः सन्ति। रक्तकमल-श्वेतकमल-नीलकमलश्च।तद्यथा-श्वेतकमलस्य कृते पुण्डरीक, रक्तकमलस्य कृते कोकनद, नीलकमलस्य कृते इन्दीवरम् इति भेदानुसारं संज्ञा वर्तते।[35] एतेषां सर्वेषां भेदानामुपयोगसन्दर्भस्य प्रयोगविज्ञानं


©Indira Gandhi National Open University

आयुर्विज्ञानस्य विवेचनक्रमे करिष्यामि। वस्तुतः कमलम् शीतोष्णप्रदेशेषु प्रायः सर्वत्र सरोवरेषु भवति, अस्य मूलं सरोवरस्थपङ्के एव प्रसरति। पत्रं द्वादशाङ्गुलतः षट्त्रिंशत् अङ्गुलपरिमितं वृत्ताकारं भवति। पुष्पाणि प्रायः ग्रीष्मवर्षर्तौ च विकसन्ति। स्वल्पकालव्यतीतानन्तरं पुष्पस्य गर्भे बीजानि भवन्ति, तेषामेव हिन्दीभाषायां कमलगट्टा, संस्कृतभाषायां पद्मबीजं, मराठीभाषायां कमलकाकडी, गुजरातीभाषायां पावडी इति कथ्यते। अनेन प्रकारेण शास्त्रेषु कमलस्य विविधाः पर्यायाः एवं रूपेण प्राप्यन्ते। यथा - कमलम्, नवपत्रं, संवर्तिका, कर्णिका, किञ्जल्कम्, मृडालम्, स्थलकमलम्, कुमुदम्, कुमुदिनी, कल्हारम् इति एतेषां प्रयोगविज्ञानं आयुर्वेदविज्ञानधिया भिन्ना-भिन्ना वर्तन्ते

**रसायन विज्ञानात्मकं महत्त्वम्–**

कमलस्य आधुनिकरासायनिकतत्त्वविषये लिखितं वर्तते हि अस्य कंदेषु बीजेषु च प्रोटीन, कार्बोहाइड्रेट, कैल्शियम, फास्फोरस, एस्कार्बिक एसिड एवं शर्करा प्राप्यते।[36] एतदतिरिक्तं मेथिलकोरिपेलिन, नेफेरिन, आइसोलिइन्सिनिन, तथा लोटुसिन, बीटा साइटोस्टरॉल, पॉमिटिक एसिड, ग्लोकोज अपि लभ्यते।[37] पादपेषु एक्लेलाइड, रोइमेरिन, डिहाइड्रोरोइनसिनिन, न्यूसिफेरिन, एनोनिन, लिरिनडिन, लिइन्सिनिन, आइसोलिइन्सिनिन, नामकं रसायनकं तत्त्वं विद्यन्ते। कमलपुष्पेषु आइसोक्वरसिन, केम्फेरॉल, गैलक्टोरम्नोग्लूकोसाइड एवं ल्यूटियोलिन प्राप्यते।[38]

**आयुर्वेदात्मकं महत्त्वम्–**

आयुश्शास्त्रे कमलस्य विविधप्रजातीनां तथा च एतस्य अवयवानांगुणानु प्रयोग विषये विस्तारेणवर्णनं लभ्यते। तत्रादौ कमलस्यगुणाःनिरूप्यन्ते। यथा–


Volume 4, Issue 2, 2025, p 49-66, ISSN 2583-6331
©Indira Gandhi National Open University

**कमलं शीतलं वयं मधुरं कफपित्तजित्। तृष्णादाहालविस्फोटविषवीसर्पनाशनम् ॥**[39]

अथनामोल्लेखपूर्वकं कमलभेदाँस्तद्गुणाँश्चाह–

**विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्। रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥४**

**धवलं कमलं शीतं मधुरं कफपित्तजित्। तस्मादल्पगुणं किचिदन्यतोत्पलादिकम् ॥**[40]

अनेन प्रकारेणपद्मिनी। तस्या लक्षणनामगुणानाह –

**मूलनालदलोत्फुल्लफलैः समुदिता पुनः। पद्मिनी प्रोच्यते प्राबिसिन्यादि च सा स्मृता।।**

**आदिशब्दावलिनी कमलिनीत्यादि ॥**

**पद्मिनी शीतला गुर्वी मधुरा लवणा च सा। पित्तामुक्कफजुद्रूक्षा वातविष्टम्भकारिणी।।**[41]

अथ नवपत्रादि। तस्य नामान्याह-

**संवर्त्तिका नवदलं बीजकोशस्तु कर्णिका। किञ्जल्कः केशरः प्रोक्तो मकरन्दो रसः स्मृतः।**

**पद्मनालं मृणालं स्यात्तथा बिसमिति स्मृतम् ॥**

**संवर्तिका हिमा तिक्ता कषाया दाहतृटप्रणुत्। मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशिनी ॥**[42]

अथ कर्णिका (बीजकोशः)। तस्या गुणानाह –

**अस्य कर्णिका तिक्ता कषाया मधुरा हिमा। मुखवैशद्यकुल्लध्वी तृष्णाऽत्रकफपित्तनुत् ॥**[43]


©Indira Gandhi National Open University

अथ किञ्जल्कः (कमलकेशरः)। तस्य गुणानाह –

**किल्कः शीतलो वृष्यः कषायो ग्राहकोऽपिसः। कफपित्ततृषादाहरक्ताशेविषशोथजित् ॥[44]..**

अथ मृणालं शालूकञ्च। तयोर्गुणानाह –

**मृणालं शीतलं वृष्यं पित्तदाहाजिद् गुरु ॥**

**दुर्जरं स्वादुपाकश्च स्तन्यानिलकफप्रदम्। संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम् ॥[45]**

अथ स्थलकमलम्। तस्य नामगुणानाह-

**पद्मचारिण्यतिथराऽव्यथा पद्मा च शारदा। पद्माऽनुष्णा कटुस्तिक्ता कषाया कफवातजित्।**

**मूत्रकृच्छ्रश्मशूलघ्नो श्वासकासविषापहा ॥[46]**

**चतुर्धा स्थलपद्मानि सेवन्ती गुलदावदी। नैपाली च गुलाबश्च बकुला कदम्बकः ॥**

अथ कुमुदम् “ कमोदनी " इति लोके। तस्य नामानि गुणांश्चाह-

**श्वेतं कुवलयं प्रोक्तं कुमुदं करवं तथा। कुमुदं पिच्छिलं स्निग्धं मधुरं हलादि शीतलम् ॥[47]**

अथ कुमुदिनी। तस्या नामगुणांश्चाह -

**कुमुद्वती कैरविका तथा कुमुदिनीति च ॥**
**सा तु मूलादिसर्वाङ्गरुक्ता समुदिता बुधैः।**
**पद्मिन्या ये गुणाः प्रोक्ताः कुमुदिन्याश्च ते स्मृताः॥[48]**

अथ कल्हारम्। तन्नामगुणानाह-

**सौगन्धिकं तु कल्हारं हलकं रक्तसन्ध्यकम्। कल्हारं शीतलं ग्राहि विष्टम्भि गुरु रूक्षणम् ॥[49]**


Volume 4, Issue 2, 2025, p 49-66, ISSN 2583-6331
©Indira Gandhi National Open University

अत्र प्रतिपादिताः उपर्युक्ताः आयुर्वेदवैज्ञानिकाः सर्वे प्रयोगाः मनुष्याणां व्याधिशमनाय हिताय सुखाय च वर्तन्ते। अतः कमलवनस्पतीनां सर्वासां प्रजातीनां संरक्षणं सर्वाधिकप्रयत्नेन करणीयम्।

**धार्मिकं महत्त्वम्**–

सनातनपरम्परायां कमलस्य अनेकविधाः प्रयोगाः वर्तन्ते। अथर्वपरिशिष्टानुसारं एतद् नक्षत्रशान्तिविधेः स्नानार्थम् उपयुज्यते।[50] कमलपुष्पं भगवत्याः लक्ष्म्याः अत्यन्तं प्रियमस्ति। अस्य बीजस्य कमलगट्टा इति नाम अस्ति। एतस्य प्रयोगः प्रायः समेषु होमद्रव्येषु भवति। विशेषरूपेण दुर्गायागकर्मणि दुर्गासप्तशतीश्लोकेन कमलगट्टाबीजेन होमः अपि विधीयते। भारतीयवास्तुविज्ञानदृष्ट्या निवासयोग्यग्रामचयने उल्लखितं वर्तते हियस्य नगरस्य समीपे कमलयुक्तः सरोवरः वर्तते स एव सर्वोत्तमः निवासस्थानम् इति कथ्यते।[51]अथ च रत्न मालायांतु प्रत्येक ग्रहाणामौषध स्नानमुक्तम्वर्ततेतत्र चन्द्र-बुध ग्रहशान्त्यर्थं अस्यप्रयोगःप्राप्यते। यथा-

**पञ्चगव्यगजदानविमित्रैः शङ्खशुक्तिकुमुदस्फटिकैश्च।**
**शीतरश्मिकृतहन्तृ स्नानमेतदुदित नृपतीनाम्।।**
**गोमयाक्षतफलैः ससरोजैः क्षौद्रशुक्तिनवमूलहेमभिः।**
**स्नानमुक्तमिदमत्र भूभृता बोधनाशुभविनाशनंबुधैः।।**[52]

एतदतिरिक्तं कमलस्य अन्येऽपि धार्मिकाः उपयोगाः सन्ति तथापि अत्र यथोपलब्धधिया प्रतिपादनं वर्तते।

**निष्कर्षः -**

महाकविःसम्पूर्णे काव्ये कमलपुष्पस्य यद्वा कमलपत्र-नाल-परागादिसन्दर्भस्योल्लेखं काव्यकथाप्रसङ्गात् करोति। परन्तु काव्ये आगतं कमलं यद्वा कमलावयवानां


©Indira Gandhi National Open University

तत्वानामुपयोगः परिचयश्च मानवजीवनस्य कृते अतीववैज्ञानिकःअस्ति।अनेन लेखनेन जनसामान्याः वानस्पतिकस्वरुपपूर्वकं कमलान्तर्गतनिहितआधुनिकरासायिनिकं तत्त्वेन सहैव आयुर्वेदात्मकं गुणज्ञानपूर्वकम् अस्य धार्मिकगुणेन सह परिचिताः भविष्यन्ति। अतः देशहितस्य लोकहितस्य च कृते कमलपुष्पस्य सर्वेषां प्रजातीनां संरक्षणं सम्वर्धनं सर्वविधप्रयत्नेन भवेत्।

**सन्दर्भग्रन्थाः-**


1. कालिदासग्रन्थावलिः, आचार्यरेवाप्रसादद्विवेदी,कालिदाससंस्थानम् महामनापुरी, वाराणसी सन् 2011
2. कुमारसम्भवमहाकाव्यम्, डा. राजेश्वरशास्त्रीमुसलगॉवकर चौखम्भासंस्कृतभवनम् वाराणसी, सन् 2005
3. ए कम्पेनिडियम ऑफ इन्डियन मेडिसिनल प्लांट्स, वोल्यूम 2, आर पी रस्तोगी, इन्फोरमेशन डॉरेक्टोरेट नई दिल्ली एण्ड सेन्ट्रल ड्रग रिसर्च इन्स्टीट्यूट, लखनऊ 1991,
4. भावप्रकाशनिघण्टुः - डॉ. गंगासहायपाण्डेयः ,चौखम्भासंस्कृतसंस्थानम्, वाराणसी सन् 1977
5 .द्रव्यगुणविज्ञानम् -आचार्य प्रियव्रतशर्मा, सन् 1984
6. द ट्रिटीज ऑफ मेडिसनलप्लान्ट्स (भाग- 1-4), ए.चटर्जी एवं एस. सी. पक्राशी, इन्फॉरमेशन डारेक्टोरेट,सी.एस.आइ.आर, नई दिल्ली सन् 1991-1995
7. Cosmetics & Perfumes in Sanskrit Literature A Study एम.पद्मनाभमराठे मैंगलोर विश्वविद्यालय,मैंगलोर 2009


**सन्दर्भाः-**

---

[1]. वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्। सहस्रपत्रं कमलं शतपत्रं कुशेशयम्।
पङ्केरुहं तामरसं सारसं सरसीरुहम्। बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च।। भा.प्र.नि. पुष्पवर्गः-श्लो.1-2,

[2] . कुमारसम्भवम् - 1.40


©Indira Gandhi National Open University

[3]. कुमारसम्भवम् - 1.43
[4]. कुमारसम्भवम् -2.2
[5]. कुमारसम्भवम् - 2.29
[6]. कुमारसम्भवम् - 2.33
[7]. कुमारसम्भवम् - 2.44
[8]. कुमारसम्भवम् - 3.37
[9]. कुमारसम्भवम् - 3.49
[10]. कुमारसम्भवम् - 3.65
[11]. कुमारसम्भवम् - 3.76
[12]. कुमारसम्भवम् - 4.6
[13]. कुमारसम्भवम् - 4.29
[14]. कुमारसम्भवम् - 5.9
[15]. कुमारसम्भवम् - 5.19
[16]. कुमारसम्भवम् - 5.21
[17]. कुमारसम्भवम् - 5.27
[18]. कुमारसम्भवम् - 5.52
[19]. कुमारसम्भवम् - 6.68
[20]. कुमारसम्भवम् - 7.16
[21]. कुमारसम्भवम् - 7.38
[22]. कुमारसम्भवम् - 7.74
[23]. कुमारसम्भवम् - 7.86
[24]. कुमारसम्भवम् - 7.89
[25]. कुमारसम्भवम् - 8.19
[26]. कुमारसम्भवम् - 8.26
[27]. कुमारसम्भवम् - 8.30
[28]. कुमारसम्भवम् - 8.32
[29]. कुमारसम्भवम् - 8.35
[30]. कुमारसम्भवम् - 8.39
[31]. कुमारसम्भवम् - 8.70
[32]. कुमारसम्भवम् - 8.85
[33]. कुमारसम्भवम् - 8.86
[34]. कुमारसम्भवम् - 12.23
[35]. विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।


©Indira Gandhi National Open University

रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्।। भा.प्र.नि.पुष्पादिवर्गः – श्लो.4,

36. द्रव्यगुणविज्ञानम् -आचार्य प्रियव्रतशर्मा, सन् 1984

37. ए कम्पेनिडियम ऑफ इन्डियन मेडिसिनल प्लांट्स, वोल्यूम 2 आर पी रस्तोगी, 1991,

38. द ट्रिटीज ऑफ मेडिसनलप्लान्ट्स (भाग- 1-4), ए.चटर्जी एवं एस. सी. पक्राशी, सन् 1991-1995

39. भा.प्र.नि. पुष्पवर्ग- श्लो. 3,

40. भा.प्र.नि. पुष्पवर्ग- श्लो. 4 - 5,

41. भा.प्र.नि. पुष्पवर्ग- श्लो. 6 -7,

42. भा.प्र.नि. पुष्पवर्ग- श्लो. 8 -9,

43. भा.प्र.नि. पुष्पवर्ग- श्लो. 10,

44. भा.प्र.नि. पुष्पवर्गः - श्लो. 11,

45. भा.प्र.नि. पुष्पवर्गः - श्लो. 12-13,

46. भा.प्र.नि. पुष्पवर्गः - श्लो. 14,

47. भा.प्र.नि. पुष्पवर्गः - श्लो. 15,

48. भा.प्र.नि. पुष्पवर्गः - श्लो. 16-17,

49. भा.प्र.नि. पुष्पवर्गः - श्लो. 18,

50. अथर्वपरिशिष्टम् – 1.48.8

51. अथर्ववेदः – 6.106.1

52. Cosmetics & Perfumes in Sanskrit Literature A Study पृ.-245


©Indira Gandhi National Open University